नामांक Roll No.

| | | | | | | |
|---|---|---|---|---|---|---|
| | | | | | | |

No. of Questions — 27

# P—95—Sanskrit (V)

No. of Printed Pages — 7

# प्रवेशिका परीक्षा, 2015

## संस्कृतविशेषः

समय : $3\frac{1}{4}$ होराः

पूर्णांक : 80

**परीक्षार्थिभ्यः सामान्यनिर्देशाः**

(1) परीक्षार्थिभिः सर्वप्रथमं स्वप्रश्नपत्रोपरि नामाङ्काः अनिवार्यतः लेख्याः ।

(2) सर्वे प्रश्नाः अनिवार्याः ।

(3) सर्वेषां प्रश्नानामुत्तराण्युत्तरपुस्तिकायामेव लेखनीयानि ।

(4) एकस्य प्रश्नस्य सर्वे भागाः एकत्र एव लेखनीयाः ।

(5) सर्वे प्रश्नाः संस्कृतभाषयैव उत्तरणीयाः ।

1. ''नपुंसकाच्च'' इति सूत्रस्यार्थं लिखत । 1

2. निर्देशानुसारं रूपाणि लिखत — $\frac{3}{4} + \frac{3}{4} = 1\frac{1}{2}$

(अ) रमा शब्दस्य तृतीया विभक्तेः ।

(ब) मति शब्दस्य पञ्चमी विभक्तेः ।

3. निम्नपदयोः मूलशब्दं विभक्तिं वचनं च लिखत — $\frac{3}{4} + \frac{3}{4} = 1\frac{1}{2}$

(अ) सख्युः

(ब) रामे ।

4. निर्देशानुसारं धातुरूपाणि लिखत — $\frac{3}{4} + \frac{3}{4} = 1\frac{1}{2}$

(अ) ''कृ'' धातोः लट् लकारे उत्तमपुरुषस्य रूपाणि लिखत ।

(ब) 'गम्' धातोः लङ् लकार, प्रथमपुरुषस्य रूपाणि लिखत ।

5. निम्नपदयोः लकारं पुरुषं वचनं च लिखत — $\frac{3}{4} + \frac{3}{4} = 1\frac{1}{2}$

(अ) अत्ति

(ब) ददातु ।

6. सूत्रम् प्रपूरणीयम् ? 2

हल्ङ्याब्भ्यो ............................................................ ।

7. ''पुत्रेण सहागतः पिता'' इत्यत्र केन सूत्रेण तृतीया भवति ? 2

8. ''उपधा संज्ञा'', ''विभक्ति संज्ञा'' च अनयोः सूत्रं लिखित्वा तयोः अर्थोऽपि लिखत । 2

9. ''याडापः'', ''स्त्रियाः'', ''त्रि चतुरोः स्त्रियां तिसृ चतसृ'' इति सूत्रेषु द्वयोः-सूत्रयोः अर्थोः लेख्यः । 1 + 1 = 2

10. अव्ययस्य लक्षणम् लिख्यताम् । 2

11. नमः स्वस्ति स्वाहा स्वधाऽलंवषड् योगाच्च, येनाङ्गविकारः इत्यनयोः सूत्रयोः सोदाहरणम् अर्थो लेख्यः । $1\frac{1}{2} + 1\frac{1}{2} = 3$

12. निम्नाङ्कितेषु छन्दःसु कयोश्चित् **द्वयोः** लक्षणोदाहरणानि लेख्यानि — $1\frac{1}{2} + 1\frac{1}{2} = 3$

(अ) मालिनी

(ब) हरिणी

(स) मन्दाक्रान्ता ।

13. अधोलिखितेषु अलङ्कारेषु **द्वयोः** अलंकारयोः लक्षणोदाहरणे लिखत — $1\frac{1}{2} + 1\frac{1}{2} = 3$

(अ) दृष्टान्तः

(ब) विशेषोक्ति

(स) रूपकम् ।

14. विना, उच्चैः, वृथा, सहसा, मनाक् इत्यादिषु केषाञ्चन त्रयाणाम् अर्थं लिखित्वा संस्कृत वाक्येषु प्रयोगं कुरूत । $1 + 1 + 1 = 3$

15. निम्नलिखित शब्दानां पर्यायत्रयं लिखत — $1 + 1 + 1 + 1 = 4$

(i) दुहिता

(ii) नयनम्

(iii) स्त्री

(iv) माता ।

16. अधोलिखितेषु प्रश्नेषु यथेच्छं **चत्वारः** प्रश्नाः समाधेयाः — 1 + 1 + 1 + 1 = 4

(i) पृथ्वीं के धारयन्ति ?

(ii) पापसंहारिणी नदी काऽस्ति ?

(iii) सर्वेषां धर्मसाधनं किम् ?

(iv) देवाः कैः प्रसन्नाः भवन्ति ?

(v) प्रतापाय पत्रं केन प्रेषितम् ?

(vi) रामदेवः कुत्र दत्तलक्ष्यः ?

17. अधोलिखितेषु प्रश्नेषु यथेच्छं **पञ्चः** प्रश्नाः समाधेयाः — 1 + 1 + 1 + 1 + 1 = 5

(i) विष्णुशर्मा कीदृशः अध्यापक आसीत ?

(ii) "मृतोऽसौ सञ्जीवकः" इति केन कस्मै कथितम् ?

(iii) को बभूव वर्धमानः ?

(iv) के राजानो भ्रष्टसेवकैः वञ्चयन्ते ?

(v) उत्तमभृत्याः कदा राजानं त्यजन्ति ?

(vi) शाखामृगाः मधुरफलानि दृष्ट्वा किमकुर्वन् ?

(vii) पिङ्गलकसमीपे कः किमर्थञ्चागतः ?

18. अधोलिखितयोः कथयोः **एकस्याः** सारांशं स्व संस्कृते हिन्द्यां वा लेख्यः — 2

(i) बुद्धि-माहात्म्यम् ।

(ii) टिटिभ-समुद्र-कथा ।

19. अधोलिखितेषु प्रयोगेषु **द्वयोः** ससूत्रं सिद्धिः कार्या — $2\frac{1}{2} + 2\frac{1}{2} = 5$

रामाय, हरेः, बहुश्रेयस्यै, गाम, सर्वे ।

20. निम्नलिखितेषु प्रयोगेषु **द्वयोः** ससूत्रं सिद्धिः कार्या — $2\frac{1}{2} + 2\frac{1}{2} = 5$

रमया, द्वयोः, तिसृणाम् , स्त्रियम्-स्त्रीम् , मर्ताः ।

21. अधोलिखितेषु प्रयोगेषु **द्वयोः** ससूत्रं सिद्धिः कार्या — $2\frac{1}{2} + 2\frac{1}{2} = 5$

ज्ञाने, दघ्ना, वारीणि, मधुनी ।

22. अधोलिखितोदाहरणेषु केषांचन **पञ्च** प्रयोगाणां ससूत्रं विभक्तिं निर्दिशत —
1 + 1 + 1 + 1 + 1 = 5

(i) द्रोणो व्रीहिः

(ii) गां दोग्धि पयः

(iii) रामेण बाणेन हतो बाली

(iv) जटाभिः तापसः

(v) अक्ष्णा काणः

(vi) कृष्णस्य कृति

(vii) कटे आस्ते ।

23. अधोलिखित गद्ययोः **कस्यचिदेकस्य** सप्रसंग व्याख्या कार्या — 3

उत्तरापथेऽर्बुदशिखरनाम्नि पर्वते दुर्दान्तो नाम महाविक्रमः सिंहः तस्य पर्वत-कन्दरम् अधिशयानस्य केसराग्रं कश्चन मूषकः प्रत्यहमागत्य छिनत्ति । तत स्वकेसराग्रं लूनं दृष्ट्वा कुपितो हि विवरान्तर्गतं दुष्टात्मानं मूषकमलममानो मनसि चिन्तयामास-कथमेनं क्षुद्रं दुरात्मानं लभेयम् ।

**अथवा**

देव ! नाहमत्रापराधी । आगच्छन्नहं बलात् सिंहान्तरेण पथि धृतः । तस्याग्रे पुनः आगमनाय शपथं कृत्वा स्वामिनं निवेदयितुमागतोऽस्मि । सिंहः सकोपमाह-सत्वरं चल मया सह, दर्शय तं च दुरात्मानं स क्व तिष्ठति ?

24. **कस्याप्येकस्य** श्लोकस्य सप्रसङ्गान्वयपूर्वकं व्याख्या कार्या — 3

(i) उत्साह सम्पन्नमदीर्घ सूत्रं

क्रियाविधिज्ञं व्यसनेष्वसक्तम् ।

शूरं कृतज्ञं दृढसौहृदञ्च

लक्ष्मी: स्वयं याति निवासहेतो: ॥

**अथवा**

(ii) मैनावती मानसराजहंसम्

वंशावतंसं हतदैत्यकंसम् ।

श्री रामदेव रमणीयरूपं

वन्दे रूणीचापुर दिव्यभूपम् ।।

25. अधोलिखित पद्ययो: **कस्यचिदेकस्य** सप्रसङ्गान्वय भावार्थो लेख्य: — 3

(i) वृतं यत्नेन संरक्षेद् , वित्तमेति च याति च ।

अक्षीणो वित्तत: क्षीणो, वृत्ततस्तु हतो हत: ॥

**अथवा**

(ii) आर्यभट्टं वियन्मण्डले स्थापयत् ,

पोखरण् भूमिगर्भेऽणुशक्तिं किरत् ।

शान्तिकार्येष्वणुं प्रेरयत्सन्ततं,

भूतले भाति मेऽनारतं भारतम् ॥

26. **कमप्येकं** विषयमवलम्ब्य शतपदेषु संस्कृते निबन्धं लिखत — 4

(i) विद्या धनं सर्वधनप्रधानम् ।

(ii) परोपकाराय सतां विभूतयः ।

27. स्वयं आर्यनः इति मत्वा राजकीय प्रवेशिका संस्कृत विद्यालय — सीकरस्थ प्रधानाध्यापकाय दिनत्रयस्य रुग्णावकाशाय प्रार्थना-पत्रं लिखत । 3

**अथवा**

भवतः मित्रं राकेशः प्रवेशिका कक्षायां प्रथमं स्थानं प्राप्तवान् । अतः स्वं किशोरं मत्वा मित्राय वर्धापनपत्रं लिखत् ।